पूर्णाहन्ताविमर्शः

कौलो जानकीनाथः

(सारस्वत्याः सुषमायाः २६ व० ३ अ० प्रतिमुद्रणम्)

मार्गशीर्षपूर्णिमा, वि० सं० २०३१

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः

वाराणसी–२२१००२ (उ० प्र०)

पूर्णाहन्ताविमर्शः[1]

कौलो जानकीनाथः,
७७-ब्राबीयार, श्रीनगरम्, कश्मीरः ।

या काचिद्वै क्वचिदपि दशा कश्चिदभ्यासपूरा-
दानन्दाख्या गुरुकरुणया यस्य कस्या भवेन्नः ।
सिद्धिस्सैवा सुरपितृनृणां यस्यमकस्या भवेत् तत्
तं स्वात्मानं विश्ववपुषं साध्यसिद्धं प्रपद्ये ॥

पूर्णाहन्ताया विमर्शोऽतीव दुरूहोऽस्ति यतः पूर्णाहन्ता 'स्वानुभूत्येकमाना' एव काचिद्दशा भवति, ततस्तस्यानुसन्धानं मोक्षकाङ्क्षिभिर्यतिभिरेवानुमेयमस्ति । तथापि सज्जनोपस्थित्या समलङ्कृतेऽस्मिन्तन्त्रसम्मेलने स्वान्तःसुखाय विद्वज्जनपरितोषाय च एतस्मिन्विषये किञ्चिद्वर्णयितुं साहसः क्रियते ।

अहन्तास्वरूपम्—

अहन्ता द्विप्रकारा । तत्र एकाऽनुलोमप्रकृत्या निमित्तोपादानेन निर्मिते दृश्यप्रपञ्चे जीवस्य जाग्रदवस्थायां सङ्कल्पविकल्पात्मिका स्थूलदेहपर्यन्ता 'इदमहम्, इदं मम' इति रूपेण वर्तते । एतज्जीवस्याज्ञावस्था, यतोऽस्माद् द्वैतप्रथाप्रथनमेव दृढतां याति । अस्यामवस्थायां जीवोऽनेकासु यातनासु त्रिविधतापयुते संसारे पीडितो भवति । मोहिन्या माययाभिभूतो जीवो जन्ममरणदुःखमेवानुभवति ।

द्वितीयप्रकाराऽहन्ता साधनचतुष्टयानन्तरम् ऋतम्भराख्यायाः प्रज्ञाया वर्धनादेव साधकस्य परमार्थपथे विचरतः प्रतिलोमप्रकृत्या स्थूलसूक्ष्मप्रपञ्चस्य प्रविलापनाभ्यासेन शून्यभावमापन्ने ब्रह्मणि प्रथमं प्रविलापनरूपा तदनन्तरं साक्षिरूपब्रह्मणि शिष्यमाना 'ज्ञाननिर्धूतकल्मषा' शिवस्वरूपलाभरूपा एव भवति ।

शक्तिपात एवात्र मुख्यं कारणम्, यतः—

ईश्वरानुग्रहादेव पुंसामद्वैतवासना ।
महद्भयपरित्राणा विप्राणामुपजायते ॥

अन्यच्च,

"यमेवैष वृणुते तेन लभ्य-
स्तस्यैष आत्मा विवृणुते तनूं स्वाम् ।"
(कठोपनिषद्)

भगवद्दर्शनमनुप्रविश्यापि तत्र ये विप्रतिपन्नास्तेषामवर्गलोऽपि शक्तिपातो नायातः ।

यथोक्तं शैवतन्त्रेषु—

१. अयं निबन्धः वाराणसेयसंस्कृतविश्वविद्यालये तन्त्रसम्मेलने विदुषा लेखकेन पठित आसीत् ।

ये श्रीमत्के शासनमार्गे कृतदीक्षाः
संगच्छन्तो मोहवशाद्विप्रतिपत्तिम् ।
नूनं तेषां नास्ति भवद्धानुनियोगः
शङ्कोचः किं गुर्वकरिम्नामरसानाम् ॥

अतोऽनुग्रहोपलब्धा ये स्वहोरात्रोदयसंहाराग्रपूरकरेचकप्रशम आरूढाः, प्रातःसन्ध्याकुम्भकभावे स्थिताः 'न द्रष्योऽस्येककस्थितः', "यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते", "सर्वसङ्कल्पसन्यासी" इति भावेन लोकोत्तरा अप्राप्यप्रकाशनपरा एव योगिनः, त एव पूर्णाहन्ताया अवगाहने क्षमाः ।

एतदेवास्मिता समावेशाभ्यासरूपा ।

"इदं सर्वं यदयमात्मा", "शिव एव गृहीतपशुभावः" इति क्रमशः श्रुत्या काश्मीरशैवमतोक्त्या च ज्ञानिनो यदा—

ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतम् ।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ॥

इति प्रत्यग्दृष्ट्या "सर्वं ब्रह्मैव" इति दर्शनेन कर्माणि नित्यनैमित्तिकादीनि सर्वाणि सर्वात्मनि ब्रह्मणि संन्यस्य सर्वं ब्रह्मैवेत्यनेन प्रविलापनं कुर्वन्ति, यथा—

यथा जलं जले क्षिप्तं क्षीरे क्षीरं घृते घृतम् ।
अविशेषो भवेद् तद्वज्जीवात्मपरमात्मनोः ॥

तदैव तेषां ज्ञानिनां पूर्णाहन्ता केवलमात्रानुभवरूपा "न शक्यते वर्णयितुं गिरा तदा" भवितुमर्हति । ते ज्ञानिनस्तदैव प्रकाशैक्यमापन्ना भवन्ति ।

ततः पूर्णाहन्ता समावेशारूढा परप्रमातृरूपा, सजातीयवृत्तिप्रवाहविजातीयतिरस्कारतैलधारावदिति दृढाभ्यासानन्तरमेवानुभवरूपा भवति । साक्षिभावेऽपि शान्ते सति, निष्कलं परिच्छेदशून्यं शिवं परिशिष्यति । यथात्मोपनिषद्—

न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः ।
न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ॥

अन्यच्च—

अन्तर्लक्ष्यं बहिर्दृष्टिर्निमेषोन्मेषवर्जिता ।
सा भवेच्छाम्भवी मुद्रा सर्वतन्त्रेषु गोपिता ॥

(शैवदर्शने) आगमशास्त्रेष्वपि—

शिवनमसि विगलिताक्षः
कौलिकत्युन्मेषविकसितानन्दः ।
प्रज्वलितसकलरन्ध्रः
कामिन्या हृदयकुहरमधिरूढः ॥

योगी शून्य इवास्ते
तस्य स्वयमेव योगिनी हृदयम् ।
हृदयनभोमण्डलगं
समुच्चरत्यनलकोटिशतदीप्तम् ॥

एतदेवास्मितात अहन्ताया वैलक्षण्यप्रदर्शनम् । अस्या अवस्थाया अभ्यासाय गुरुः शिष्य-मुपदिशति (गातव्यमिदम्)—

तस्मिन्नेव ब्रह्मणि—तस्मिन् ब्रह्मणि
रे चित् ! विचर विगतदर्पेण
नाभिभूतः कन्दर्पेण । —तस्मिन्नेव०
त्यक्त्वा मायामोहावेशं
भावय कोऽहं भज सर्वेशम् ॥ —तस्मिन्नेव०
विचरन्नप्यस्मिन् संसारे
पश्यात्मानं स्फुटविस्तारे । —तस्मिन्नेव०
रे चित् ! चेतय चिन्तातीतं
चारुचमत्कृतचञ्चलत्वम् । —तस्मिन्नेव०
'त्वं'पदलक्ष्यार्थं तं श्रुत्वा
स्वच्छन्दश्चर 'तद्' विदित्वा । —तस्मिन्नेव०
जानकीनाथं जगन्मायेशं
भज तं त्यक्त्वा त्रिगुणावेशम् ॥ —तस्मिन्नेव०

सच्छिष्यः स्वानुभवं वदति (एतदपि गातव्यम्)—

अजोऽनामयोऽहमनाख्योऽचलोऽह-
मसंगोऽमयोऽहमव्यक्तोऽखिलोऽहम् ।
अशेषोऽक्रियोऽहमलिप्तोऽतुलोऽहम्,
चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥
अनाद्योऽक्षयोऽहमदूरोऽमरोऽह-
मपारोऽपरोऽहमनन्तोऽजरोऽहम् ।
अकर्ताऽच्युतोऽहमभोक्ताऽमलोऽहं
निजानन्दरूपः शिवोऽहं शिवोऽहम् ॥
अहं नित्यमुक्तो निराकारधीरोऽ-
स्म्यहं निर्विकल्पो निराधारतृप्तः ।
अहं निष्क्रियो निर्विबन्धः परेशः
सदानन्दरूपः शिवोऽहं शिवोऽहम् ॥
अहं निश्चलो निरपेक्ष उदारोऽ-
स्म्यहं नित्यशुद्धो निरालम्बभद्रः ।
अहं निर्मलो निरवद्यः खकारो
महानन्दरूपश्शिवोऽहं शिवोऽहम् ॥

अहं ज्ञानगम्यो गिरातीतशम्भु-
रहं ज्ञानरूपः परातीतसाक्षी ।
अहं चिद्विमर्शः कलातीतव्यापी
शिवानन्दरूपः शिवोऽहं शिवोऽहम् ॥
अहमद्भुतः सद्घनः सर्वरूपोऽ-
स्म्यहमूर्ध्वाधः चिद्घनः चित्सुकारः ।
अहं सदसत्सर्वगस्सर्वरूपी
निरानन्दरूपश्शिवोऽहं शिवोऽहम् ॥
अहं निर्विवादो निराधारगूढोऽ-
स्म्यहं व्यापको बोधभानुश्च गुप्तः ।
अहं कारणं केवलः कर्मकर्ता
परानन्दरूपश्शिवोऽहं शिवोऽहम् ॥
प्रकृष्टः प्रगल्भः प्रतप्तः परोऽह-
मकार उकारो मकारेश्वरोऽहम् ।
स्वतन्त्रोऽवितर्कोऽविकारोऽक्षरोऽहं
दयानन्दरूपश्शिवोऽहं शिवोऽहम् ॥
अहं परमप्रेमास्पदं प्रेमकर्ताऽ-
स्म्यहं ज्ञानज्ञेयस्वरूपः परात्मा ।
अहं चिन्मयो नित्यचैतन्यरूपः
चिदानन्दरूपश्शिवोऽहं शिवोऽहम् ॥
गगनाम्बरोऽहं च संतृप्तस्वस्थोऽ-
स्म्यहं पूर्णरूपश्च शान्तिस्वरूपः ।
अहं शक्तिसन्दोहविजृम्भितात्मा
गिरानन्दरूपश्शिवोऽहं शिवोऽहम् ॥
अहमादिमध्यान्तहीनः पुरात्माऽ-
स्म्यहं युक्तप्रत्यक्षरूपः शिवात्मा ।
अहं ब्रह्मास्मीति बोद्धाऽचलात्मा
स्थिरानन्दरूपश्शिवोऽहं शिवोऽहम् ॥
परामर्शसाराहंनामशतक-
मिदं यः पठेदहं पराऽस्मीति ध्यात्वा ।
अहङ्कारनिर्मूलनं चेति कृत्वा
स नन्दति नन्दति नन्दयेच्च ॥

●●●